# संस्कृत वार्ताः

**दिनाङ्क : - 15.01.2025** **प्रात: - 06:55**

## अथ वार्ता:

### प्रधानमन्त्री -महाराष्ट्रयात्रा

प्रधानमन्त्री नरेन्द्रमोदी अद्य मुम्बय्या: एकदिवसीययात्रारतो भविष्यति। तत्रासौ आई. एन् .एस्. सूरत- आईएन्एस्. नीलगिरि-आई.एन्.एस्. वाग्शीर- इत्येतान् त्रीन् योद्धपोतान् राष्ट्राय समर्पयिष्यति। प्रात:काले सम्बद्धकार्यक्रम: अद्य सार्धदशवादने मुम्बईनगर्या: नेवल-डॉक्यार्ड इत्यत्र समायोज्यते। आधिकारिक- सूत्रानुसारि एतेषां त्रयाणां योद्धपोतानां प्रवर्तनेन रक्षाविनिर्माणक्षेत्रे सागरीयसुरक्षायाञ्च भारतस्य वैश्विकनेतृत्वस्य दृष्टिं साकारीकर्तुं महत्वपूर्ण: पदक्षेपो भविष्यति । अद्य दिनस्य द्वितीये भागे श्रीमोदी नवीमुम्बय्या: खारघरइत्यत्र श्रीश्रीराधा-मदनमोहनजी- मन्दिरस्यापि उद्घाटनं करिष्यति ।

### प्रधानमन्त्री/ हरिद्रा-सङ्घ:

प्रधानमन्त्रिणा नरेन्द्रमोदिना राष्ट्रिय- हरिद्रा- मण्डलस्य सुस्थापनामभिलक्ष्य प्रसन्नता प्रकटिता। एकस्मिन् सामाजिक- प्रसार- सन्देशे तेनोक्तं यत् सूचनेयं भारतस्य श्रमजीविभ्यः कृषकेभ्यः सुखकरा अस्तीति। असौ प्रावोचत् यत् मण्डलमिदं हरिद्राया: उत्पादने नवाचारं वैश्विकसंवर्धनं मूल्यवर्धनञ्च सुपोषयिष्यति। अपि च आपूर्ति-श्रृङ्खला सदृढा अथ च कृषका: उपभोक्तारश्च लाभान्विता: भविष्यन्ति इति। वाणिज्योद्योगमन्त्रिणा पीयूषगोयलेन ह्य: नवदिल्लयाम् आभासियमाध्यमेन राष्ट्रिय- हरिद्रा- मण्डलस्य उद्घाटनं विहितम्।

### सिङ्गापुरराष्ट्रपति:

सिङ्गापुरदेशस्य राष्ट्रपति: थर्मन्-षण्मुगरत्नम् इत्यसौ पञ्चदिवसीययात्रायै भारतं प्रत्यागतवान्। तेन सह एकम् उच्चस्तरीयमण्डलम् समागतम् यस्मिन् मन्त्रिण: सांसदा: अधिकारिणश्च सम्मिलिता: सन्ति। सिङ्गापुरस्य राष्ट्रपतित्वेन तस्य इयं प्रथमा भारतयात्रा भवेदिति। स्वीयप्रवासावधौ राष्ट्रपति: थर्मन् इत्येष: राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया सह विचारविमर्शमपि समाचरिष्यति । प्रधानमन्त्री नरेन्द्रमोदी अपि सिङ्गापुरस्य राष्ट्रपतिना सह मन्त्रणां विधास्यति। राष्ट्रपति: थर्मन् इत्ययम् अस्य मासस्य सप्तदशदिनाङ्कत: अष्टादश दिनाङ्कं यावत् ओडिशायात्रां करिष्यति। राष्ट्रपते: थर्मन इत्यस्य यात्रया उभयो: देशयो: मध्ये द्विपक्षीय-सम्बन्धेभ्य: इतोऽपि गति: मेलिष्यति इति आशास्यते।

### प्रधानमन्त्री- मिशनमौसम इति

प्रधानमन्त्री नरेन्द्रमोदी ह्य: देशं वातावरणसज्जं राष्ट्रं कर्तुं मिशनमौसम इत्यस्य अभियानस्य शुभारम्भं कृतवान्। नवदिल्ल्या: भारतमण्डपे भारतस्य वातावरणविभागस्य सार्धैकशततमस्य स्थापनादिवसस्य उत्सवस्य समये एतत् शुभारम्भितम्।

अस्मिन् अवसरे प्रधानमन्त्रिणा उक्तं यत् मिशनमौसम इति भारतस्य स्थायित्वं भविष्यते च सज्जं राष्ट्रं निर्मातुं प्रतिबद्धताया: प्रमाणभूतम् अस्ति। श्रीमोदी भारतीय-ऋतु-विज्ञानविभागस्य सार्धैकशत-वर्षीययात्रायाः प्रशंसाम् अकरोत्, अयं कश्चन देशे आधुनिकविज्ञानस्य प्रौद्योगिक्याः च गौरवपूर्णः अध्यायः अस्ति इति सः वर्णितवान् । सः प्रकाशितवान् यत् आईएमडी इति न केवलं कोटिशः भारतीयानां सेवां करोति अपि तु भारतस्य वैज्ञानिक-प्रगतेः प्रतीकभूतत्वेनापि वर्तते |

### रक्षामन्त्री – जम्मूकश्मीर:

रक्षामन्त्री राजनाथसिंह: सूचितवान् यत् पाकिस्तानाधिकृतकश्मीरेण विना जम्मूकश्मीरराज्यम् अपूर्णमस्ति इति। जम्मूसम्भागस्य बाह्यक्षेत्रे अखनूर इत्यत्र सेनाद्वारा आयोजिते पूर्वसैनिकानां सम्मेलने रक्षामन्त्री न्यगादीत् यत् पाकिस्तानाधिकृत-कश्मीर: आतङ्कवादीनां प्रशिक्षणशिबिरेभ्य: उपयुज्यते।

### बैडमिण्टनप्रतिस्पर्धायाम्

भारतीयमुक्त-बैडमिण्टनप्रतिस्पर्धायाम्, सात्विकसाईराज-रंकीरेड्डी-चिराग-शेट्टी-इत्येतौ ह्य: नवदिल्ल्यां पुरुषयुगलस्पर्धाया: प्रागुपान्त्यचक्रे समाविष्टवन्तौ।